यथाच मनुः । ५ । ४० ।
"ओषध्यः पशवो वृक्षास्तिर्य्यञ्चः पक्षिणस्तथा ॥"
"तिर्य्यञ्चः कूर्म्मादयः ।" इति तट्टीकायां कुल्लूकभट्टः ॥) पशुः । इति हेमचन्द्रः । ३ । १०८ ॥ (यथा, पञ्चतन्त्रे । ३ । ११६ ।
"तिर्य्यञ्चं मानुषं वापि यो मृतं संस्पृशेत् कुधीः ।
पञ्चगव्येन शुद्धिः स्यात् तस्य चान्द्रायणेन च ॥")
वक्रगामी । इति शब्दरत्नावली ॥

तिर्य्यञ्ची, स्त्री, (तिर्य्यञ्च + स्त्रियां ङीप् ।) तिरश्ची । स्त्रीपशुपक्ष्यादिः । इति मुग्धबोधम् ॥

तिल, गतौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) ह्रस्वी । तेलति । इति दुर्गादासः ॥

तिल, क श स्नेहे । इति कविकल्पद्रुमः ॥ (चुरां-तुदां च-परं-अकं-सेट् ।) स्नेहः स्निग्धीभावे । क, तेलयति । श, तिलति तैलेनाङ्गम् । इति दुर्गादासः ॥

तिलः, पुं, (तिलति स्निह्यति तैलेन पूर्णो भवतीति । तिल + "इगुपधज्ञेति ।" ३ । १ । १३५ । इति कः ।) स्वनामख्यातशस्यम् । तत्पर्य्यायः । होमधान्यम् २ पवित्रः ३ पितृतर्पणः ४ पापघ्नः ५ पूतधान्यम् ६ । इति राजनिर्घण्टः ॥ स्नेहफलः ७ स्नेहफलपूरफलः ८ । अस्य गुणाः । रसे कटुत्वम् । तिक्तत्वम् । मधुरत्वम् । तुवरत्वम् । गुरुत्वम् । विपाके कटुत्वम् । स्वादुत्वम् । स्निग्धत्वम् । उष्णत्वम् । कफपित्तकारित्वम् । बल्यत्वम् । केशहितत्वम् । हिमस्पर्शत्वम् । त्वच्यत्वम् । स्तन्यत्वम् । व्रणे हितत्वम् । दन्त्यत्वम् । अल्पमूत्रकारित्वम् । ग्राहित्वम् । वातघ्नत्वम् । अग्निमतिप्रदत्वञ्च । इति भावप्रकाशः ॥ वर्णकारित्वम् ॥ * ॥
"कृष्णः पथ्यतमः सितोऽल्पगुणदः क्षीणाः किलान्ये तिलाः ॥"
इति राजनिर्घण्टः ॥
अपि च । भावप्रकाशः ।
"कृष्णश्रेष्ठतमस्तेषु शुक्लो मध्यमः सितः ।
अन्ये हीनतराः प्रोक्तास्तज्ज्ञै रक्तादयस्तिलाः ॥"
तत्तैलगुणाः । अलङ्करत्वम् । केश्यत्वम् । मधुरत्वम् । तिक्तत्वम् । कषायत्वम् । उष्णत्वम् । तीक्ष्णत्वम् । बलकारित्वम् । कफवातजन्तुखर्ज्जुव्रणकण्डूतिनाशित्वम् । कान्तिदत्वम् । वस्त्यभ्यङ्गपाननस्यकर्णाक्षिपूरणेषु हितत्वञ्च । इति राजनिर्घण्टः (तिलप्रतिग्रहनिषेधो यथा, ब्रह्मपुराणे ।
"ब्राह्मणः प्रतिगृह्णीयात् वृत्त्यर्थं साधुतस्तथा ।
अयश्वमपि मातङ्गतिललौहांश्च वर्ज्जयेत् ॥"
तिलदाने फलमाह विष्णुः ।
"तिलप्रदः प्रजामिष्टां दीपदश्चक्षुरुत्तमम् ॥"
तथा महाभारते ।
"कल्यमुत्थाय यो विप्रः स्नातः शुक्लेन वाससा ।
तिलपात्रं प्रयच्छन् वै सर्व्वपापैः प्रमुच्यते ॥"
शुद्धितत्त्वे ।
"प्रेतमुद्दिश्य यो दद्यात् हेमगर्भांस्तिलान्नृप ! ।
यावन्तस्ते तिलाः स्वर्गे तावत्कालं स मोदते ॥"
सप्तमीं नवमीं पर्व्वकालञ्च त्यक्त्वा तिलतैलेनाङ्गानि विमृद्य स्नानं कर्त्तव्यम् । यथा, मार्कण्डेये ।
"सर्व्वकालं तिलैः स्नानं पुण्यं व्यासोऽब्रवीन्मनुः ।
श्रीकामः सर्व्वदा स्नानं कुर्व्वीतामलकैर्नरः ।
सप्तमीं नवमीञ्चैव पर्व्वकालञ्च वर्ज्जयेत् ॥"
तिथितत्त्वे जन्मतिथिकृत्ये ।
"तिलोद्वर्त्ती तिलस्नायी तिलहोमी तिलप्रदः ।
तिलभुक् तिलवापी च षट्तिली नावसीदति ॥"
रात्रौ तिलान्वितवस्तुमात्रं न भक्षयेत् । यथा, काशीखण्डे ।
"सर्व्वञ्च तिलसम्बद्धं नाद्यादस्तमिते रवौ ॥"
तिलैस्तर्पणनिषेधस्तत्प्रतिप्रसवादिकञ्च तर्पणशब्दे द्रष्टव्यम् ॥) तिलकालकः । यथा,—
"देवगुरुप्रसादेन जिह्वाग्रे मे सरस्वती ।
तेनाहं नृप जानामि भानुमत्यास्तिलं यथा ॥"
इति कालिदासः ॥
(स्वल्पप्रमाणम् । तिलतुल्यत्वादस्य तथात्वम् । यथा, राजतरङ्गिण्याम् । ४ । ३२८ ।
"तिलं तिलं तं कृत्वा च चिक्षिपुर्दिक्षु सर्व्वतः ।
नगरान्निर्गतैः सैन्यैर्हन्यमानाः पदे पदे ॥")

तिलकं, क्ली, (तिलति स्निह्यतीति । तिल + "कुन् शिल्पिसंज्ञयोः ।" इति कुन् ।) क्लोम । कृष्णवर्णसौवर्च्चलम् । इत्यमरः । २ । ६ । ६५ ॥ सौवर्च्चलम् । इति मेदिनी । के, १०० ॥

तिलकः, पुं, (तिल इव कायतीति । कै + कः ।) पुष्पवृक्षविशेषः । तत्पर्य्यायः । विशेषकः २ मुखमण्डनकः ३ पुण्ड्रकः ४ पुण्ड्रः ५ स्थिरपुष्पी ६ छिन्नरुहः ७ दग्धरुहः ८ मृतजीवः ९ तरुणीकटाक्षकामः १० वासन्तसुन्दरः ११ दुग्धरुहः १२ भालविभूषणसंज्ञः १३ पुन्नागः १४ रेठकः १५ । इति राजनिर्घण्टः ॥ क्षुरकः १६ श्रीमान् १७ पुरुषः १८ क्षत्रपुष्पकः १९ । इति भावप्रकाशः ॥ (यथा, रघुः । ९ । ४१ ।
"न खलु शोभयति स्म वनस्थलीं
न तिलकस्तिलकः प्रमदामिव ॥")
अस्य गुणाः । पाके कटुत्वम् । वातपित्तकफनाशित्वम् । बलपुष्टिमेदःकारित्वम् । हृद्यत्वम् । लघुत्वञ्च । तत्त्वग्गुणाः । कषायत्वम् । उष्णत्वम् । पुंस्त्वदन्तदोषकृमिशोफव्रणरक्तदोषनाशित्वञ्च । इति राजनिर्घण्टः ॥ * ॥ (तिल + स्वार्थे कन् ।) शरीरस्थतिलः । तत्पर्य्यायः । तिलकालकः २ । इत्यमरः । २ । ६ । ४९ ॥ कालकः ३ पिप्लुः ४ जडुलः ५ । इति हेमचन्द्रः ॥ * ॥ मरुवकः । इति रत्नमाला ॥ अश्वभेदः । रोगभेदः । इति मेदिनी । के, १०० ॥ शेषस्य निदानलक्षणे यथा,—
"कृष्णानि तिलमात्राणि नीरुजानि समानि च ।
वातपित्तकफोच्छ्रेकात् तान् विद्यात्तिलकालकान् ॥"
इति माधवकरः ॥
प्रधाने त्रि । इति नानार्थध्वनिमञ्जरी ॥ ध्रुवकभेदः । यथा,—
"पञ्चविंशतिवर्णाढ्यस्तिलको ध्रुवको भवेत् ।
इष्टश्चचत्पुटे ताले रसे वीरेऽद्भुतेऽपि वा ॥"
इति सङ्गीतदामोदरः ॥

तिलकः, पुं क्ली, (तिलवत् तिलपुष्पवत् कायतीति । कै + कः ।) चन्दनादिना ललाटादिद्वादशाङ्गकर्त्तव्यचिह्नविशेषः । तत्पर्य्यायः । तमालपत्रम् २ चित्रकम् ३ विशेषकम् ४ । इत्यमरः । २ । ६ । १२३ ॥ (यथा, माघे । ३ । ६३ ।
"विशेषको वा विशिशेष यस्याः
श्रियं त्रिलोकीतिलकः स एव ॥")
अथ द्वादशतिलकविधिः । पद्मपुराणे उत्तरखण्डे ।
"ललाटे केशवं ध्यायेन्नारायणमथोदरे ।
वक्षःस्थले माधवन्तु गोविन्दं कण्ठकूपके ॥
विष्णुञ्च दक्षिणे कुक्षौ बाहौ च मधुसूदनम् ।
त्रिविक्रमं कन्धरे तु वामनं वामपार्श्वके ॥
श्रीधरं वामबाहौ तु हृषीकेशन्तु कन्धरे ।
पृष्ठे तु पद्मनाभञ्च कट्यां दामोदरं न्यसेत् ॥
तत्प्रक्षालनतोयन्तु वासुदेवेति मूर्द्धनि ॥"
किञ्च ।
"ऊर्द्ध्वपुण्ड्रं ललाटे तु सर्व्वेषां प्रथमं स्मृतम् ।
ललाटादिक्रमेणैव धारणन्तु विधीयते ॥ इति ।
एवं न्यासं समाचर्य्य सम्प्रदायानुसारतः ।
न्यसेत् किरीटमन्त्रञ्च मूर्द्ध्नि सर्व्वार्थसिद्धये ॥"
अथ किरीटमन्त्रः । ओम् श्रीकिरीटकेयूरहारमकरकुण्डलचक्रशङ्खगदापद्महस्तपीताम्बरधरश्रीवत्साङ्कितवक्षःस्थलश्रीभूमि-सहितस्वात्मज्योतिर्दीप्तिकराय सहस्रादित्यतेजसे नमो नमः ।" इति श्रीहरिभक्तिविलासे ४ विलासः ॥ तस्य धारणप्रकारो यथा,—
"द्वादशाङ्गे ललाटादौ तिलकं हरिमन्दिरम् ।
स्नानान्ते वैष्णवः कुर्य्यात् प्रत्येकं कृष्णनामभिः ॥
वामे वक्षसि नेत्रान्ते गण्डेऽंशे शङ्खचिह्नितम् ।
तथैव दक्षिणे कुर्य्याद्धरेश्चक्राङ्कितं मुने ! ॥ * ॥
ललाटे केशवं विद्यात् कण्ठे श्रीपुरुषोत्तमम् ।
वामबाहौ वासुदेवं सव्ये दामोदरन्तथा ॥
नाभौ नारायणञ्चैव माधवं हृदये तथा ।
गोविन्दं दक्षिणे पार्श्वे वामे चैव त्रिविक्रमम् ॥
विष्णुं सव्ये कर्णमूले दक्षिणे मधुसूदनम् ।
शिरोमध्ये हृषीकेशं पद्मनाभञ्च पृष्ठतः ॥
हरेर्द्वादशनामानि पठित्वा तिलकानि तु ।
यः कुर्य्याद्वैष्णवो नित्यं स प्रेमभक्तिमाप्नुयात् ॥ * ॥
ये कण्ठलग्नतुलसीभवकाष्ठमाला
ये द्वादशाङ्गहरिनामकृतोर्द्ध्वपुण्ड्राः ।
ये कृष्णभक्तिसुदृढा धृतशङ्खचक्रा-
स्ते वैष्णवा भुवनमाशु पवित्रयन्ति ॥ * ॥
तिलकन्तूर्द्ध्वपुण्ड्राख्यं मध्यच्छिद्रं हि नारद ! ।
यदि कुर्य्याल्ललाटे तद्विज्ञेयं हरिमन्दिरम् ॥
आनासामूलमाश्रित्य शिरोमध्यगतं मुने ।
हरिपादाकृतं नासामूलमारभ्य यत्नतः ॥